र्पयित्वा दक्षिणादिभिर्भूसुरांस्तर्पयित्वा वस्त्रालंकरणादिभिः सुहृत्कलत्रादीन्तर्पयित्वा व्रजेतु। किं कुर्वन्स्ने
हानुवृत्तिं सृजन्। स्नेहेन अनुवृत्तिः पुनर्गृहागमनं अयं भावः। यात्रार्थं बहिर्गतः पुत्रादिस्नेहेन अनुवृत्तिः पुनर्गृ
हागमनं स्यात् तदावलोकनार्थं गृहं नागच्छेदिति। कथंभूतो राजा तृप्तः। बुभुक्षितो न गच्छेदिति भावः। पुनः किंलक्ष
णः। कार्यमनःकार्याय उत्कंठितो न तः कारणः तथा वररत्नवल्लभां। खनिकेतान्सुरभवनान्प्रधानाश्रयान्गुरून्गृहा
द्वापि। यायी कृताग्निकार्यः। प्राश्य हविष्यं द्विजानुमतो मिति। तथा च बृहस्पतिः। दैवज्ञं पूजयित्वा तु विदिद्धृपः पूज्य
शक्तितः। प्रदक्षिणमिमं कृत्वा तिष्ठं ध्यायेदमापतिमिति। तथा च ज्योतिःप्रकाशे। संतोष्य स्वागतान्विप्रान्जात्वा प्रति
रूपादिकं। शुचिः शुक्लांबरो   योनतेष्टं सुमनाव्रजेतु। तथा च कश्यपः। यात्रासमये वृद्धानुपरागे ग्रहस्य वेषम्ये गोम
हिरण्यवस्त्रैः संपूज्य श्राद्धं याच दैवज्ञमिति। बृहद्यात्रायां। स्नातो भुक्तोनुलिप्तस्रग्वर्णालंकारसंवितः। शुक्लांबरधर
श्रीमान्द्विरगमुखमेधनैः। भूपालवल्लभे।। ब्राह्मणं नावमन्येत कोपयेन्न निजांगनां। यात्रां कृत्वा गृहं नैव सिद्धकामो
विशेद्गृहमिति। लल्लः। यात्रायां प्रस्थितोपश्च ब्राह्मणानवमन्यते। तदंतं जीवितं तस्यानाशौ प्रतिनिवर्त्तते।। ३।। इह

घात्रायां॥ यात्रास्तु संप्रस्थितो यात्रां स्वकार्यो गाभिनं दति। कार्यो वा नागमिन देन गास्य प्रतिविवर्त्तनमिति। तथा च रत्न
वल्लां। कोशवाय दिवाप्य इंद्रपमे हनि शस्यते॥ द्वितीये यो ऽनंगलां निवर्त्तत महीपतिः॥३॥ तृतीयो जनं स्वा इंव
से स्वाक्रमादुत्तरः॥ ततः परं यथेष्टं तु यायान्मार्गं महीश्वर इति॥ अथ यात्रिकस्य नियममाह॥४॥ कोधक्षौररति
श्रमामिषगुडघृताश्रुदुग्धासवक्षाराभ्यंगमथामिलांबरवमीस्तैलं कटुं सेद्धमे। क्षीरक्षौररतीः क्रमात्त्रि ३ शर
५ सप्त हं परं तद्दिने रोगः स्यात् नवकं सितान्य तिलकं प्रस्थानके पीतिव॥१५॥ क्रोधेति। क्रोधप्र० क्षौरप्र० रतिमैथु
नं। श्रमः क्लेशः। आमिषं मांसं। गुडप्र० घृतं घृतरमणं। अश्रुः। अश्रुमोक्षणं। दुग्धप्र० आशवो मद्यं। क्षारं क्षारद्र
व्यं माषादि। अभ्यंगस्तैलाभ्यंगः। मथं कं वारिपुमथमिति यर्थः॥ अमिलां वसनि। अश्रुमवस्त्रा। णि रक्तं कृष्णादीनि
वमीर्वमनं। तैलप्र० कटु मरीच्यादि। इत्येतत्क्रमेने उसेत्यजेत्। अथ युक्तेषु किं किं कतिदिनं त्यजेदित्याह। क्षीरेति
क्षीरक्षौररतीः क्रमात्त्रि ३ शर ५ स ७ हां स्तत्यजेत्। क्षीरं दुग्धं त्र्यहं ३ क्षौरं शराह ५ पंचाह। रतिसप्त ७ हं त्यजेदित्यर्थः
परं उर्वरितं तत्पूर्वाण दिने त्यजेत्। तिलान्य तिलकं। श्वेतव्यतिरिक्तं तिलकं। पीतको स्तुआदिकं तत्रैव मुहूर्त्ते समये किं
सजेत्। प्रस्थानके पि इत्येतत्त्यजेत्। प्रस्थानकं नाम मुहूर्त्ते समये किंचिदभिष्टवस्तु चालनं। तदुक्तं रत्नमाला
यां। छत्रायुधांघमनस्सर्वमिष्टं चालयद्वैजयिकं जयार्थी॥ एतत्तु कार्यवशात् क्रियते। प्रस्थाने संपूर्णा फलं ना
स्ति। तथा च रत्नकोशे। कार्यवशात्स्वयमगमे प्रभर्तुः केचिदाचार्याः। छत्रायुधाद्यमिष्टं वैजयिकं निर्गमे कु

पुरिति। तथा गर्गः स्वचारी रोगय कश्चित्तु निर्गच्छेच्छुद्ध्यान्वितः। तस्या यात्राफलं सर्वं संपूर्णपथि सिद्धार्थांति। ५॥ तच्चाला
वधि ग्रंथांतरात्। ग्रहाङ्कहां तरं गर्गा अहं हंसी मांतरं भृगुः। शारक्षेपात् भरजोव सिष्ठा नगराद्ध हिः। एवं प्रस्थाने कृतेपि
स्वयमन्यस्मिन् यस्मिन् शुद्दिने गच्छेत्। तथा च ज्योतिः प्रकाशे। प्रस्थापि कृतेने याम्भ हा दोषान्विते दिने॥ भार्गयो गंवि
नाकाल वृष्ट्यादोषात्सुतेतत्येति। रत्नमालायां। वसेन्न चौक त्रादि माने क्षिती शोऽहि नासिनो सप्तच मंडलीकेः यः प्र
कृतः सोपि च पंचरात्रं भद्रेण यात्रापरतः प्रयोजयेत्॥ ५ एवंविधे प्रस्थाने पि क्रोधक्षौर रता दीन्वर्जयेदित्यर्थः॥
गर्गः। क्रोधक्षौर रतिं वातितैलाभ्यंगाश्रु मोक्षणं। घृतं मांसं गुडं तैलं याने मद्यं परित्यजेत्॥ इति रत्नकोशे। कलीय
कं हिंगुलकः कुंकुमं रक्तचंदनं। पीतरक्तं च भमनं च च वमनं यातुर्नेष्टानि तत्क्षणादिति॥ च्चहत्यात्रां। कटतैलगुड
क्षीपक्कमांसासनं तथा॥ मुक्त्रियो याति मोहेन व्याधितः सन्निवर्तते। ठलुः प्रमत्तो व्याधितः शांतः भीतः क्रुद्धो बुभुक्षि
तः॥ अध्यानं न च पच्छेत् क्लीवे नेशस्तथैव च। रत्नवल्यां। स्वकीयां परकीयां वा स्त्रियं पुरुषमेव च। ताडयित्वा तु योग
च्छेत्तत्र दंतस्य जीवितं भृगोः॥ त्रिरात्रं वर्जयेत्॥ क्षीरं पंचाहं। क्षौरकर्मैव॥ तदहश्चावशेषाणि समाहमैथुनं त्यजेत्
यात्रायां गमनलक्षणं। गर्गः केशेयं मुहूर्तं समये प्राप्ते हंस वा गांघ्रिणा व्रजेत्। देवग्रामासु विप्राश्च पुरो स्वजनैर्वृतः
पूर्वदक्षिणामुद्दयपादं यात्रां तराधिपः॥ द्वात्रिंशच्च पदं गत्वा यानमारुह्य संव्रजेत्॥ ततो निरीक्षयेत्तस्य कूरा
कुनाश्च शुभाशुभान्। तयो वसदत्स शाहा त्रिर्मितानि च वै ब्रवीत्। इदानीं शकुना नाह॥ वस्त्रालंकारणानि

२१ पूर्णकलशस्तौर्यध्वनिः पुत्रवान् शंखादर्शनृपाश्वदंतिसुरभिद्रव्याणि शुक्लोवृषः स्त्रीपुष्पधान्यादि च॥ दोलादीप
विधूमवह्निसुरभिद्रव्याणि शुभ्रोवृषो वेश्याछत्रवितानचामरकुमार्यो मीनगोरोचने॥ वस्त्रालंकरणानीति। वस्त्रा
श्वेतवस्त्राणि। अन्यान्यपशकुनमध्ये पठितानि। अलंकरणानि। सुवर्णादिनिर्मितानि। पूर्णकलशः प्र॰ तौर्यः वाजंत्रध्व
निः पुत्रवान् प्र॰ शंखप्र॰ आदर्शदर्पणः। नृपो राजन्यः अश्वप्र॰ हस्तीप्र॰ सुरभिर्गौः स्त्री सौभाग्यवती। पुष्पाणि श्वे
तानि। धान्यानि कृष्णानि तु अपशकुनमध्ये पठितानि। आदिशब्देन सुवर्णादिधातवः। दोलाप्र॰ दीपप्र॰ विधूम
वह्निः धूमरहितोग्निः। सुरभिद्रव्याणि। कर्पूरचंदनादी। शुक्लोवृषः। श्वेतवृषभः। वेश्याप्र॰ छत्रंप्र॰ वितानं वस्त्रनिर्मितं
॥ चामरप्र॰ कुमारीप्र॰ मीना मत्स्या जलादुद्धृता गोरोचनाप्र॰ अयसंकोचे नाह। ७॥ यद्यत्स्वांतनितांततोषकरणं को
रुद्धृतं गोमयं मृच्चांभोर्थघटान्वितः सहचरो धौतांबरो मोत्रकः। दूर्वादर्भरथाः फलास्त्रमदिरावणी गुरुर्दैववी हिस्रो
मित्रमृगा वरोदनशवं सिद्धार्थदुग्धादि च। १२०॥ यद्यदिति। यद्यद्वस्तु स्वांतनितांततोषकरणं। स्वांत अंतःकर
णं यस्य नितांतं अतिशयितं तोषकरणं संतोषजनकं तत्किं बहुनोक्तेन। एवं संकोचेनोक्तेष्वनीएषु संतोषभावः
पूर्वार्थैः शकुनमध्ये पठितानि। पॉन्तोह। गोरुद्धृतगोमयं कोः पृथिव्याः उधृतं गोमयं॥ मृच्चा पृथिव्या मुद्धृता
मृत्तिका। अंभोर्थघटान्वितः सहचरः उदकार्थं कुंभयुक्तो जनः सन् सहचरः सहचरतीति सहचरः जलार्थी रिक्त
कुंभस्तत्पथिकेन सह व्रजेत्॥ निवर्तते यथापूर्णार्थः रुनार्थः परिकृत्स्नषा। इत्यक्तलात्। धौतांबरो मोत्रकः

धूतवस्त्ररजकः। दूर्वा प्रसिद्धः। दर्भाप्र० दूर्वांमौदे दत्तणो। पशुर्गो। अपशकुनमध्ये यत्तृणं पठितं तदोष्यतिरिक्तं। रपत्र०
फलं मांसं। अस्वंरक्तं। मदिरामद्यं। वर्णी ब्रह्मचारी गुरुप्र० दैवज्ञो ज्योतिर्विद्। विप्रो द्वौ। ब्राह्मणौ मित्रं इष्टः मृगप्र० अ
गोदनशावं गोदनरहितं प्रेतं। सिद्धार्थाः गौरशर्षपाः। दुग्धादि। दुग्धाज्यं। ननु यद्यस्तां तन्निजां तदोषकरणे मित्यने
न दुग्धग्रहणमर्थेनैव सिद्धं। पुनः किमुक्तं। दुग्धमिति सत्यं। भक्षणे निषिद्धं। तत्संदेहनिरासार्थं दुग्धग्रहणमित्य
दोषः। एवमेवान्यत्र विचारणीयमित्यदोषः। एवमेवान्यत्रविचारणीयं। तथा च वसंतः। दध्यक्षतदूर्वाक्षणपूर्णकुंभ
सिद्धान्नसिद्धार्थकचंदनानि। अदर्शशंखामिषमीनमद्यागोरोचनागोमयमृद्धनं गोः भारद्वाजः शुजाविप्रो सुहृ
द्वेश्या सपुत्रा स्त्री कुमारिका। अभीरुयोनगोस्त्रीवागजो वाजिवृषसितः॥१॥ रजोधः तान्यवर्णैगोः सवत्सा चवि
शेषतः। उद्धृतं गोमयं मीनं मृत्तिका नोधृता तथा॥२॥ रजको धौतवस्त्रं च वपनीये त्रिकोध्वनिः। जयमंगल
शब्दाश्च शांतिपाठप्रदीपकाः॥३॥ दीपो वा प्रज्वलन्नग्निपूर्णकुंभं नृपाशवं॥ मद्यं मांसं च रुधिरं भक्ष्याणि भवि
विधानि च॥४॥ रौप्यं ताम्रं मणिं स्वर्णं द्रव्यं दर्पणमक्षतान्॥ वितानचामरं छत्रं दूर्वा वह्निपत्रध्वजः॥५॥ दोला
वा रूरपोल्लापुत्रपौत्रार्थ्यपुकः शुचिः। चंदनानि सुगंधीनि तथा पुष्पाणि रोचना॥६॥ घृतं दधि पयः पेया भिद्धम
न्नं च वः शुभः॥ दैवज्ञास्त्र गुरुर्देवश्चितोत्सा हकराणि च॥७॥ इष्टा तानि नरो यायात्सर्वार्थलभते तु सः॥८॥ कुर्वंद
क्षिणतः सदैतदितरद्वामप्रकुर्वन्व्रजेद्ध्रुवं। स्यानृधनविट् तुषागमलवणो पानत्तृणायस्करः॥ पिण्याको

षधकृष्णधान्यरुद्दनेतक्रंसधूमोनलः कार्पासारुणपुष्पचर्मचगुडस्तैलायसीकर्दमः॥१२२॥ कुर्वन्निति॥ एतत् अन
तरोक्तंसत् अशुभं॥ दक्षितः दक्षिणभागेकुर्वन्सन् इतरत् अशुभंवक्ष्यमाणं वामेकुर्वन्सन् व्रजेत् गच्छेत्॥ तुषंधान्या
अयाशुभमाह॥ भस्मेति॥ भस्मप्र॰ अस्थिप्र॰ इंधनप्रसिद्धः विट्विष्टा॥ तुषंधान्यादीनांत्वक् फल्गु॥ अस्मपाषाणः
लवणंसमुद्रिकं॥ उपानहौप्र॰ तृणंप्र॰ अयस्कारोलोहकरः पिण्याकंमर्दिततिलः॥ औषधप्र॰ कृष्णधान्यंमाषादि
रुद्दनादिप्र॰ तक्रंप्र॰ सधूमोग्निः॥ कार्पासःप्र॰ असितपुष्पप्र॰ चर्मप्र॰ गुडप्र॰ तैलप्र॰ अयसीलोहजन्या॥ कर्दमः
प्र॰॥ ७॥ मत्तोवांतबुभुक्षितौतकखला मुंडीजटीव्याधितः खंडव्यंगदिगंबरो यतिररिः काषायिमुक्तालकौ॥ चैराभ्य
क्तमलाविलाश्वपतितः पाश्यर्गलीगुर्विणीवंध्याकृष्णद्वपाहिभेकसरठगोधावराहःशशाः॥१२३॥ मत्तेति॥ मत्तः उ
न्मत्तः॥ वांतोवमितः बुभुक्षितौतकः॥ अतःक्षुत्ः प्राणिहिंसकः॥ खलादुर्जनः मुंडीमुंडितः॥ जटीजटितः॥ व्याधितःरो
गी॥ खंजः पादेनखंजः॥ व्यंगः अंगहीनः दिगंबरोनग्नः यतीसन्यासी॥ अरिर्वैरी काषायी गैरिकरंजितवस्त्रः मुक्ता
लकौ मुक्तकेशः चोरप्र॰ अभ्यक्ततैलाभ्यक्तः मलाविलोमलिनः॥ पतितोजातिभ्रष्टः पाशीप्राणिवंधनार्थंपाशवान्
अर्गली॥ अर्गलावान्॥ गुर्विणीसगर्भा॥ वंध्यानिरपत्या॥ कृष्णवृषः कृष्णोनड्वान्॥ अहिःसर्पः भेकोमंडूकः सरटः
प्र॰ गोधाःप्र॰ वराहप्र॰ शशःप्र॰॥ ७॥ जोहोतमहिषःखरोष्ट्रमहिषारूढाश्वरिक्तोघटश्छिन्नप्राणिशिरोंगकंपप
दवीबंधाःकुशागाहवौ॥ पातोयानपलायनं स्वकलहः षंढ्क्षतगोजलहद्देमेति प्रतिबंधकाः कुशाकुनाच्छि

काधिकाःस्युर्हताः॥ १२४॥ जाहो। खिति॥ जाहकः मंडली। लोके शेहली तिप्र० जाहको गोत्रसंको चीमंडलीच बुधैः स्मृ
तः इतिहला युधः। ओतुर्मार्जालः महिषप्र० खरोष्ट्रमहिषाः कूटः प्र० रिक्तो घटः प्र० छिक्का क्षुतं। प्राणिशिरोगकंपः
प्राणिनां गोश्वश्वादीनां शिरो टनं अरुह्य टनं च। पद्वी वंधाः मार्गवधाः उल्लंघना माहिषि मार्गो विध्यते। कुवाकु।
कुत्सितवाच। काश्रवणः अहवः संग्रामो विजन्मा न महिषादीनां। पातः पतनं। वस्त्रादीनां स्खलनं। यानपलायनं
अश्वादितस्य पलायनं। श्वकलहः शुनो कलहः षंढनपुंसकः। गोक्षुतं प्र० ज्वलद्दहः ज्वलद्दहः दर्शनं इत्येते प्रकु
नाः प्रतिबंधकाः कार्यप्रति बंधकाः स्युः छिक्कादिका अपशकुनाः मृत्युदाः स्युः तथा चोक्तं। अगमातरे। तृणतैलादिकौ
र्पाशाभस्म चर्मतुषाः धं। मामुद्रं उपकाहिमनवांतं बुभुक्षितमित्यादि। अपशकुनांतरमाह॥ भृंगालूकपटभु
काश्वनखिनस्त्रीसंज्ञकाः वामतः कालीकुक्कुटपुंस्पापा सुरभिर्दक्षे मनोभीष्टदाः॥ भारद्वाजशिखंडिचाषनकु
लाहंसा जएते दर्शं याता इष्टफला स्युः रासभरवो वामेपि दृष्टेर्थदः। भृंग इति। भृंगो भ्रमरः अलोथ्थश्चिकः उष्ट्रः प्र
पठनूमुकः शाङ्कुर्गीणो राजहंसः। नखिनः श्वानादयः स्त्रीसंज्ञकाः वादीकादयः॥ एते वामगता मनोभीष्टदाः स्युः
कालीमहिषी। कुक्कुटप्र० पुंस्पापा पुरुषसंज्ञकाः। काकादयः सुरभिर्गौः॥ एते दक्षे मनोभीष्टदाः स्युः॥ भारद्वाजप्र०
शिखंडीमयूरः चाषः प्रसिद्धः। नकुलाः वभ्रुः। हंसः प्र० अजो वस्ताः एते भारद्वाजादयः दर्शयाताः संतः इष्टफ
लाः स्युः अभीष्टफलदो भवतीत्यर्थः। रासभरवो गर्दभध्वनिः वामे दृष्टे अर्थदः अभीष्टार्थदो भवति॥ अथ केषु

२३ केषु विपरीतशकुनाः शुभास्तानाह ॥ नद्युत्तारभयप्रवेशसमरद्यूतेषु नष्टेक्षणे व्याधौ स्युः शुभदा विलोमशकुनाना
ड्याइडायांभर ॥ आद्ये दुःशकुने विहृत्य च शुचिर्भूत्वाष्टदास्वायमं कृत्वैव्यापदेरेष्टिशरमपरे दत्वा सुवर्णं व्रजेत् ॥ २६ ॥
नद्युत्तारेति । नद्युत्तारो नद्युत्तारणं । भयं नृपादीनां प्रवेशो ग्रामादिप्रवेशः समरः संग्रामः । द्यूतं प्र० नष्टेक्षणं नष्टवस्तुअ
वलोकनं । व्याधौ रोगापरेषु विलोमशकुनाः शुभदाः स्युः । अयमर्थः । गमने ये ये अपशकुनास्ते तत्र नद्युत्तारादिषु शु
भदाः स्युरित्यर्थः । तथा च इडायां वा डयां भरे पूर्णतायां विलोमशकुनाः स्युः । तथा च वसंतः । अथ चेदिडायां परिपूर्णतायां स
र्वोपि वामः शकुन प्र० स्यात् पिंगलायां परिपूर्णतायां सर्वोपि सव्यः शस्यः शकुनः प्रशस्तः ॥ १ ॥ संगे रणे कर्मणि च प्र
वेशे शु गृहे नष्टे विलोकने च व्याधौ सरिद्दुर्गवनादिकेषु शस्ताः प्रयाणे विपरीतभावइव । अन्यच्च । नद्युत्तारे भये
युद्धे प्रवेशे नष्टवीक्षणे शकुना व्यत्ययगाः शस्ता नृपाकल्लो के प्रयाणवत् इति । अथ प्रथमे अपशकुने जाते सति कर्तव्य
माह । आद्येति आद्ये प्रथमे दुःशकुने जाते सति विहृत्य विवर्तनं कृत्वा तत्र शुद्धदेशे उपविश्य शुचिः प्रक्षालितपाणिपा
दः । आचांतः कृताचमनः असवः प्राणास्तेषां आयमः प्राणायामः । अष्टधा अष्टवारं प्राणायामः कृत्वा इत्यात् गच्छेत्
चेत् यदि पुनः दुःशकुनः स्यात् तदा विहृत्य शुचिः शांतः । अष्टिवारं षोडशवारं असून् नियम्य यायात् । अपरे तृतीये श
कुने जाते सति सुवर्णं दत्वा इयात् ॥ एकदा वक्ष्यक गमनविषयं । प्राणानां यामानधिकानां वत्कालस्थित्वा व्रजेत् । तथा
च ज्योतिर्निबंधे विरुद्धशकुने पूर्वं प्राणायामहैं मोकन्द्वरेत् । द्वितीये द्विगुणान् कृत्वा तृतीये न व्रजेत् केचित् ॥ तथा च

वसंत॰ राजः। जाते विरुद्धे शकुने ध्वनीनो विहृत्य हत्वा करपादशौचं। आचम्य चक्षीरतरोरधस्तात् तिष्ठन्। प्रविश्येष्टकुगं
तराणीति। तथा॥ वार्हिषेणः। यद्यपशकुनं पश्येत् विपरीतमुपस्थितः। सघृतं कांचनं दत्वा निर्विशंकः सुखं व्रजेत्॥ इति मु
हूर्त्तदीपिकायां यात्राप्रकरणं समाप्तं॥ ७९।७१॥ अथ मिश्रप्रकरणं विवक्षुस्तावद्राजाभिषेकं वृत्तद्वयेनाह॥ जन्मांगर्क्षेश
शेशास्तहदिहकुजैः शार्कैर्बलिष्ठैर्मृदुक्षिप्रैन्द्रध्रुववैः स्थिरर्क्षे नृतनौ याम्ये ह्नि भूपस्थितिः। स्वस्वर्क्षे समृदुध्रुवर्क्षेच
भैः क्षिप्रैः सुरस्थापनं शाचुर्माघयुगे च राधयुगले याम्ये ह्नि पूर्वाह्नके॥ १२७॥ जन्मांगर्क्षेति। जन्मांगर्क्षदशेशावि
पि बलिष्ठैस्तथा मृदुध्रुवादिभिः स्थिरर्क्षे नृतनौ याम्ये ह्नि भूपस्थितिः शस्ता इत्यादिरध्याहारः। अगं च ऋक्षं च अगर्क्षे ज
न्मांगर्क्षे जन्मजं लग्नजन्मराशिः। तेच ऋदशा च जन्मांगर्क्षदशा दशा वर्त्तमानाः। तासां ईशाः जन्मांगर्क्षदशेशाः तेच
सूर्यश्च कुजश्च सतेज्ञोश्चत तथा ते बलिष्ठैः स्यान्नादिबलिष्ठै समृद्धैः॥ मृदुक्षिप्रैन्द्रध्रुवभैस्पष्टस्थिरर्क्षे नृतनौ रुहि
नृतनौ रुद्धिनृतनुः स्थिराचासौ रुद्धितनुश्च सातथा तस्यां। जन्मराशिजन्मजं लग्नाभ्यां स्थिरोपचयलग्ने याम्ये ह्नि
भौमरहिते दिने। भूपस्थिति राजप्रतिष्ठा शुभा स्यादित्यर्थः। लग्नबलं प्राग्वत्। प्रायश्चंद्रमिश्रा द्यबलोकनीयं॥ अथ
देवस्थापनमाह। स्वस्वर्क्षेति। यस्यदेवस्य प्रतिष्ठा क्रियते तस्य नक्षत्रैः शेषस्पष्टं सर्वामरस्थापनं कार्यमिति शेषः। ल
ग्नबलं प्राग्वत्॥ अथ वस्त्रपरिधानं तस्य क्षालनं डंदिशादिभक्षित फलं च वृत्तार्द्धेनाह॥ धार्यं वस्त्र दितीनपंचगुरुभा
श्वांत्यध्रुवेशत्रयेज्ञो नेक्षाल्यमिहाखुभक्षितमसन्मध्यत्रिभागे वरं। स्त्रीरक्तां बरभूषणे त्रविभ्रयाद्यादित्यपुष्य

२४ ध्रुवैश्चैतेर्भोरुणरुक्मयोः कुरजरवीन्दुक्षोणिशनिः शस्यते ॥१२९॥ धार्यमिति । वसुधनिष्ठा । अदितिः पुनर्वसु । इनपंचकं गु
रुभपुष्याः अश्वि । अश्विनी । अंत्य रेवती । ध्रुवाणि पूर्वोक्तानि । एतैर्नक्षत्रैर्नक्षत्रे बुधगुरुशुक्रवारे अंबरं वस्त्रं धारयेत् । अ
न्यत्र यदुक्तं रवौ जीर्णं विधौ क्लेदः कुजे लाद्रं दुःखदं कुजो बुधे धनं गुरौ ज्ञानं शुक्रे सौख्यं शनौ मलमिति । लग्नबलं प्राव
तु ॥ अथ क्षालनमाह । इहास्मिन् वस्त्रधारणोक्तेन नक्षत्रादौ क्षालनं प्रक्षालनीयं । कथंभूते इह । शौनबुधरहिते ।
उक्तं च । वस्त्रहेमालंकारं धारणोक्तैश्च सादिभिः । तत्संनहनविर्माणं विदध्यात् क्षालनादिकमिति ॥ यश्च प्रियस्त्रीगं
यदद्रोगिनो गदितभे कुर्यात् । इति पूर्वमेव अंगस्पृतं कर्मोक्तं । तथा प्रक्षालने बुधवर्जनार्थं शौने इह । क्षालमित्युक्तं
बुधनिषेधश्चार्वणात् । उक्तं च शनौ नोमामस्त केते । श्राद्धे पक्ष्या मावस्य योस्तथा । वस्त्राणां क्षालनं चैव दहत्यासप्तमं कुलं
अथ दृग्दाद्भिभक्षितफलमाह । आखुभक्षितमिति । आखुरुंदिरः । तेन भक्षितं मध्यमहे गे मध्यत्रिभागे भक्षितं असत् । दुष्ट
फलं स्यात् । एतदुक्तं भवति । वस्त्रं त्रिगुणं कृत्वा यदि भक्षितभागं मध्यत्रिभागे मध्यत्रिभागे पतितं तदा दुष्टमित्यर्थः । आ
खुरिपुलक्षणं । तेनाग्निदग्धं गवादिभक्षितं महिषादिभक्षितं ज्ञेयं । तयोश्चोक्तं च न शस्ते ॥ दग्धे वास्फुटिते च गोमय
महिष्यामहिषीएकै विलिप्ते तथा दृष्टं मूलेषु कर्पूरैर्केरशुभं मध्ये भागे शुभमिति । स्त्रियारक्तवस्त्रधारणं भूषणं अनुक्तं
ग्रहाणां कुत्र कुत्र प्रशस्तं तदुत्तराद्धेनाह । स्त्रीति । स्त्री अत्र उक्तेर्वस्त्रधारणमादौ रक्तं अवरं भूषणं सुवर्णादिभूष
णं बिभ्रयात् । धारयेत् । कथंभूते आदित्यपुष्यध्रुवैर्विततानि आदित्यपुष्यध्रुवाणि यस्मात्तत्तथा तस्मिन् । आदित्य

पुष्यध्रुवरहितेत्यर्थः। यतो स्त्रिया रक्तं वस्त्रभूषणधारणे दोषो दृश्यते। तथा चोक्तं पुष्यादित्यध्रुवैर्धिष्ण्यैस्त्वरुणैरक्तकौव
शादिकं नवनभूषणं न धार्यं नार्या दयितरागिभिरिति। लग्नबलं प्राग्वत्। अथ वर्णादीनां प्राशस्त्यमाह॥ श्वेतवस्तुनि रौप्य
मुक्ताफलादिके अत्र चन्द्रो हितः। सोमवारेस्तेन नव सु धार्यमिति भावः। कुजरवी अरुणरुक्ममयोः शस्यते। कृष्णे शनिः व
स्तुनि नीलवस्त्रादिके शस्यते। शनौ तद्धार्यमिति भावः॥ त्रै गुणत्रयेतु सर्वं धार्यमिति गुरवे वोक्तं॥ अथ नराणां भूषणां
भूषणधारणं हृत्तचरणेनाह। वस्त्रोक्तैर्व्यनिलहयाश्विभिः स्थिरगंगेनुर्विभूषाहिता विप्रोत्सवलब्धिभूदितमनुक्तेपि
एकहस्तारणं॥ मैत्रार्कानिलमूलदस्रहरिभिर्द्वीज्याजपादेन्तरे पण्यानां क्रयविक्रयो घटपरत्यंगे ४८।१११० स्मृतौ
तनौ॥१२९॥ वस्त्रोक्तैरिति। वस्त्रोक्तैर्भादिभिर्वस्त्रदेनीत्यत्रोक्तैः। अंगेस्थिरलग्नेनुः नरस्य अलंकृतिः। अलंकर
णं हिता यस्यात्। किं लक्षणैर्वस्त्रोक्तैः व्यनिलहयाश्विभिः अनिलहयं स्वातियुगं। स्वातिविशाखा अश्विनीभ्यां वि
गताः अनिलहयाश्विन्यो यस्मात् तथा तस्मिन् स्वातिविशाखा अश्विनीरहितैरित्यर्थः। लग्नबलं प्राग्वत्। अथ हि
तीयेचरणेन विशेषमाह॥ विप्राज्ञेति। विप्राज्ञा ब्राह्मणाज्ञा। उत्सवो विवाहादिकः। लब्धिर्लाभः आशु अनुक्तेपि लब्धा
धारणं वस्त्रादिधारणं इष्टं स्तत स्यात्। तथा च व्यासः॥ लब्धं राजप्रसादेन विप्रादेशात्करग्रहे। प्रीत्या दत्तं चोत्सवे वस्त्रं
धार्यं निषेधेपि भादिके॥ अथोत्तरार्द्धेन पण्यानां क्रयविक्रयावाह॥ मैत्रेति। मैत्रमनुराधा शेषं सुगमं। घटपरत्यंगे
घटः कुंभः तस्मात्परं अन्यतमं तत्र तत्र॥ क्रेत्यंगं चतुष्कयलग्नं तस्मिन् कुंभव्यतिरिक्तोपचयलग्ने पण्यानां पूरी

२७ फलस्वार्गुरादीनांक्रयविक्रयौतन्तुविस्तार्यंकुर्वादित्यर्थः॥कस्यांसत्यां।स्वशुद्धौसत्यांस्वधनस्रावः॥तस्यशुद्धिःपापर
हितंतस्यांसत्यांशेषंप्राग्वत्॥तथाचोक्तं।दशमैकादशेद्वौलग्नेवित्ते।केंद्रत्रिकोणगैःशुभैःपापस्यकर्मोक्तंवार्द्धु
यिलाघटोदयं॥अथवृत्तार्द्धेधनिष्ठापंचकवर्ज्यमाह॥श्लो॥प्रेतज्वालनशय्यकावितननेस्तंभोद्ध्रयंयाम्यदिग्या
नंकाष्ठतृणोच्चयंपरिहरेत्कुंभद्वयस्थेविधौ॥सेवेष्टाध्रुववारुणांत्यवसुभैःखायेर १०।११ रवौवाकुजेसंन्या
सस्थिरभैःखलैर्गतबलैःषष्ठांत्यगेभार्गवे॥१३०॥प्रेतज्वालनेति।प्रेतज्वालनेत्यादिकुंभद्वयस्थेविधौसतिकुं
भमीनयोश्चंद्रेसतिपरिहरेत्।सर्वथानाचरेत्॥स्पष्टं।अथोत्तरार्द्धेचरणेनसेवामाह।सेवेति।ध्रुवादिभिर्नक्ष
त्रैःसेवाइष्टास्यात्।शुभंकस्मिन्सति।खायेरवौसतिवाऽथवाकुजेसतिखंदशमंआयएकादशअनयो
रन्यतमेरविभौमयोरन्यतमेसतीत्यर्थः।यस्मिन्लग्नेसेवाक्रियतेतस्माल्लग्नात्दशमेएकादशेवाऽसौभ
वासतिसेवाइष्टाहिताकरास्यादित्यर्थः।शेषंप्राग्वत्॥अथचतुर्थचरणेनसंन्यासमाह॥संन्यासइतिस्थिर
भेस्थिरनक्षत्रेस्थिरलग्नेचसंन्यासःइष्टःस्यात्।खलैर्गतबलैःपापग्रहैर्हीनबलैरित्यर्थः।सप्तमेचेत्तृतीये
कस्मिन्सतिभार्गवेशुक्रेषष्ठांत्यगे६।१२सतिसंबलैर्लग्नःबलंप्राग्वत्॥उक्तंच।त्रिषडेकादशेसौरीव्ययेषष्ठेचभार्ग
वःसबलेधर्मपजीवेकेंद्रेदीक्षाविरक्तिकृतइति।अथवृत्तद्वयेनकृषिकार्यमाह॥श्लो॥उक्षाहर्षश्चरहिपेंद्र
लक्षघुमघाप्रेशुभास्यात्कृषिर्याकीशारस्वगान्हियुग्मझषगोकन्याविलग्नेतिथौ॥व्यंकौजसदिशिभ्रण

१।३।५।७।९।११।१३।१० मस्तगमूलमुख्यानुमितात्ख्यादनसृणौ हस्तहमुक्तसुरेषैः सौमीपदुत्त्रिर्नयेत्।१४३४॥ त्रिः३ त्रि२
त्रि३ यवन ५ ला ३ र्थ ५ गाम ३ हुतमुकु ३ मेषुर्कसुकोदसत्सङ्ख्यं। कृषिमैर्विवाकरणाहरिद्रैर्वीवापः शुभः॥ सूर्यक्षादि
तृतीयतो।३।४।५।६।७।८।९।१०। धृतितः १९।२०।२१।२२।२३।२४।२५।२६ श्राणाद्यभिः सत्पलः प्रोक्तोन्येपु
णिसप्तमाद्रविमिते १२। स्नेष्ठेदनं वापभेः। उद्वाहर्क्षेति। उद्वाहर्क्षाणि। प्रोक्तानि। मूलार्कीत्यादिति॥ एकादशासं
स्यक्तानि। चराणिप्र० द्विपविशाखा। इंद्रो ज्येष्ठा। लघुत्र्यानिप्र०। ताष्ट्रचित्रातिः या। कीशारख्यगान्हि। अर्कैःशनिः सौ
बुधः। अग्रोसोमः विगताः। अर्कैःशरेभ्यस्ततथातेच खगाश्च तेषां अहः दिनं तस्मिन्। शनिसोमबुधरहितेवारे
त्यर्थः युग्मसष्वगो क्रिन्याक्लिलग्ने युग्मोमिथुनः झषो मीनः गोवृषभः कन्याच०॥ एषामन्यतमे लग्ने। तिथौ
वं कौजे विगतः अंक्रोनवमी यस्मात् सैव्यकः स चासौ ओजश्चओनो विषमः॥ तस्मान्। नवमीव्यतिरिक्तविष
मतिथ्यावित्यर्थः किलक्षणे। य कौजे तिथौ। सदिशि दिक्संदशमी तथा सह वर्त्तमानः १।३।५।७।९।११।१०।१३
१५ कृषिशुभा स्यात्। तथा चोक्तं। चंद्रे शुभे शुभतिथौ शुभवारयोगे। गुर्वौ शशिज शुक्रगभस्तिवारे लग्ने वृष
मिथुनके सषकन्यकार्याशस्तं कृषिकरणप्रचयेनिधने इति। अन्यच्च। दशम्येकादशी चैव तृतीयाच त्रयोद
शी। सप्तमी पंचमा चैव प्रतिपद च शुभावहा। हंत्यष्टमी बलिवर्द्दं नूनं नवमी मस्यघातनी। कीटकृत्ननी चतुर्थपि
तिहंति चतुर्दशी। रवौ वहस्पतौ चंद्रे शुके कुजे [illegible] यद्दिनोषतः। बुधार्किस्मिपुत्राश्च न भवति फलप्रदाः॥४॥

॥अथविधिमाह॥सिताछादनः।श्वेतवस्त्रधरः पटुः कुशलः कर्त्ताखगमुखान्देवान्ब्राह्मणांश्चलक्ष्यांश्चैसंतोकः।
सितायत्नाःक्रियते।तत्रपूजितान्खगमुख्यान्ग्रहमुख्यान्सूर्यादीन्ब्रह्मदक्षिणापूर्वकंप्रणम्यमनोवाक्कायकर्मभिनसं
स्कृत्यस्वर्णादयष्टहलः सुवर्णघर्षिताग्रंहलंसमुष्कसुवृषैः मुष्कावृषणास्तैः सहवर्त्तमानाः समुष्काः शोभनाह
ष्टाः गुणावयवपूर्णाः निरोगाः सुमुष्काश्चसुवृषाश्चतथातैः कृत्वा सौमींउत्तरां दिशं त्रिस्त्रिवारंनयेत्तत्रलेनपश्चात्तैः
कुर्यादितिभावः।उत्तरदिशंप्रतिवारत्रयनयनेनपंचरेखाउत्पद्यन्ते।तद्यथा।प्रथमगमनेनैका।आवर्त्तनेद्वितीया
पुनरुत्तरांप्रतिद्वितीयगमनेनतृतीयापुनरावर्त्तनेनचतुर्थापुनरुत्तरांप्रतिगमनेनपंचमीरेखाउत्पद्यते।अधि
कानकार्या इतिभावः।सौमींपटुस्त्रिर्नयेत्इत्यत्रपटुपदंग्रहणंअखंडऋजुरेखाकरणार्थं।तथाचोक्तं।शास्त्रा
सुचंद्रताराम्बुमुविः शुक्लेनवाससा।स्नात्वागंधैश्चपुष्पैश्चपूजयित्वाविशेषतः पृथिवींग्रहसंयुक्तांपूजयित्वा
प्रजापतिं।अग्निंप्रदक्षिणीकृत्यदातव्याचैवदक्षिणा।कृष्णोवृषोनियोक्तव्योनवीनैश्चयते।हमेघृष्टहलाग्रेण
छिन्नरेखानकारयेत्।उत्तराभिमुखोभूत्वाक्षीरेणार्घ्यंप्रदापयेत्।विवलंछिन्नलांगूलंकपिलंवृषभंत्यजेत्॥ह
लप्रवाहणंकार्यंनिकृष्टवृषकर्षकैः हलादिभिर्वृषैः क्षेमंकुटुंबेनशुभंभवेत्।वृषभोयदियुध्येततस्यतस्यवि
घ्नसदाभवेत्।तस्मात्सर्वप्रकारेणनिर्विघ्नंकारयेत्सदा॥एकाजयकरीरेखातृतीयाचार्थवृद्धिदा।पंचमीचभ
वेद्रेखाबहुशस्यफलप्रदा।अतऊर्ध्वंनकर्त्तव्यामाहात्म्यतोभवेत्।स्मर्त्तव्याभावः शुक्रएषपुनामासचंद्रमाः

पराशरो हली चैव सार्वविघ्नोपशांतये ॥ इति ॥ अथ दुर्निमित्तानि तत्रैवोक्तानि । हले प्रवाह्यमाने तु कूर्म उत्पद्यते यदि ग
णो मृत्युरेतस्य ततो ग्नेश्च भयं भवेत् । ईषाभंगो यदा चक्षुः भग्ना यो जीवितस्य च । सुतनाशो युगे भग्ने समाने स्त्रि
यते शिशुः योक्त्रछेदे तु आसगः सस्यहानिः प्रजायते ॥ हले प्रवाह्यमाने तु गोरेकः प्रतपद्यदि ॥ प्रतपद्युक्तमात्रसुवं
धनं च प्रक्षयति । ज्वरातिसाररोगेण कृषिभंगं विनिर्दिशेत् । प्रवाहे छक्कमात्रस्तु तेना गोः स्वनते यदि । नद्दे न युक्तमा
त्रस्तु तदा शस्य चतुर्गुणमिति । अथ कृषिविषये लांचक्रमाह ॥ त्रित्रीतिः अर्कभुक्तात् सूर्यभुक्तात् तन्नात् । भकाश
तु त्रिभ्यादिषु स्थापकस्थितः स्युर्नक्षत्रेषु असत् सत् इत्येतत्फलं । हयमध्यः वाईवाः स्यात् । एतदुक्तं भवति । सूर्य
क्रांतनक्षत्रस्य आदिमनक्षत्रात् सकात् त्रिषु असत् । दुष्फलं स्यात् । तदनंतरं त्रिषु सत् । शुभं स्यात् । तत्त्रिषु असत्
त् । ततः इषु पंचसु सत् ॥ ततो अनलषु त्रिषु असत् । ततः इषु पंचसु सत् । ततो रामेषु त्रिषु असत् । अन्यो हुतभुक् त्रिषु
सत्स्वादित्यर्थः । अथ पो ओस्ति माहद्दीर्घ मिश्रैरिति ॥ कृषिभः । कृषिनक्षत्रैः उद्ध्वा हर्षचरद्विपस्वाद्विभिबीजवापः शुभः
प्रोक्तः किल क्षणैः कृषिभैः विशाखा हरिंद्रैः शाखाणं शततारा हरिश्रवणं । इंद्रो ज्येष्ठः विगतावारुणहरिंद्राः ये
ष्पस्तानि तथा तैः । शततारा श्रवणा ज्येष्ठा रहितैरित्यर्थः । कृषिभैरित्यक्षलक्षणं । तस्मात्कृष्युक्तं भवति थिवा
रादिकं ज्ञेयं तथा चोक्तं । मूषकाणां भयं भौमे मंदे शलभकीटयोः नवपल्लवितोपोरिक्ते हीने सोमे विशेषतः ॥
वृषलग्ने अथवा मीने कन्यायां मिथुने तथा । वापयेत्सर्वसस्यानि यदिच्छेत्सस्यसंपदमिति ॥ लग्नबलं प्रागुक्तं अ

२८ थबीजवापविषये द्विविधं फणिचक्रमाह। सूर्यर्क्षादिति। सूर्ययुक्तनक्षत्रात्रिरितीयतस्मात् अतिधृतितः एकोनविंशति
तस्माद्दशाष्टभिः। ततो वाष्टभिः। एकोविंशा। दृष्टभिर्नक्षत्रैर्बीजवापः शुभः अत्फलं स्यात्। अथ द्वितीयभेदमाह।
अन्यैशेति। अन्यैराचार्यैः फणिभमत्रमात् राहुसत्रमात् सकाशात् रविमिते द्वादशभिर्नक्षत्रैः बीजवापश्शुभः
शुभः स्यात्। एतदुक्तं भवति। राहुर्यस्मिन्नक्षत्रे भवति तस्मात् यत्सप्तमं नक्षत्रं तत्फणिभमत्रमुच्यते। तस्मात्सकाशा
त् द्वादशभिरित्यर्थः। राहोस्तु फणीति नामग्रंथांतरे प्रसिद्धं। वाराहमिहराचार्येण राहुस्वरूपविकल्पा ग्रंथां
तरे कृता उद्धारिताः स्वकृतसंहितायां अमृतास्वादविशेषाच्छिन्नमपि शिरः किलासुरस्येदं प्राणैरपरित्यक्तं ग्रहतां
यातं वदंत्येके इंदुर्कमंडलाच्छतिसितत्वात्। किल न दृश्यते गगने। अत्रपर्वकाद्वरप्रदानात् कमलयोने १० मुख
पुच्छविभक्तांगं भुजंगमाकारदिशंत्यन्ये। भुजंगमाकारकथनात् फणीत्यभिधानं प्रसिद्धं। रत्नमालायामपि फणि
भात् बीजोप्तिकाले स्फुटमिति॥ तथा चागमांतरे राहुभाद्धमं यावत् बीजोप्तिं परिवर्जेत्। अथ धान्यच्छेदनमाह॥
छेदनवापभैरिति। तेषां धान्यानां छेदनं वापभैः बीजवापननक्षत्रैः प्रोक्तं॥ ननु यस्यागं यदि दोगिनो गदितभै
कुर्यादिति। पुरैवोक्तं। तत्कथनं पुनरुक्तं। तच्छेदं वापभैरित्यसत्या। कृषिनक्षत्राणां जवापननक्षत्राणां च किंचिद्भे
दोस्ति द्वयोः कृष्यंगत्वात्॥ कैकार्यमिति। संदेहनिवारणार्थं छेदनवापभैरित्युक्तं। अथ निष्पन्नधान्ये कृ मत्रा। मेषो
रोपणं नृतरुरोपणं चाह॥ ७॥ मेषेशीरतनौरूफानुरहितैः कृद्वाहभैः रोपयेदन्नप्राशनवद्वसंत शारदो प्रोक्तं नवा

न्नं बुधैः। मैत्रार्को तिलममूलदं-त्यवसुत्तरेज्यवरुणैः सेंद्रैः शुभं नर्तनं लग्ने त्रे गुरुर्वीक्षते हिबुके गैः सौम्यैश्च संगीत
कं॥१३॥ मेथीमिति। मेथ्यां क्षीरोत्तेव वट द्रुक्षादेमेथिंड द्वाहमैथिवाह नक्षत्रमूलोत्तराकेंत्यादित्ति शरोपरोनिखनेत्तु॥
मेथिर्नाम खधान्यखले मर्दगाय वृषपंक्ति योजनार्थकाष्ठमारोप्यते। मेथ्यंते संगम्यंते वृषभा यस्मिन्नु इति मेथिः मु
ख्यमेथिः खले द्वारुन्यस्तं यत पशुबंधनं स्तंभः किलक्षणैः रुद्वाहमैः फानुरहितैः उफा उत्तराफाल्गुनी अनु अ
नुराधा ताभ्यां रहितैः उक्तं च। रोहिणी रेवती मूलस्वाति हस्तो मृगस्तथा। आषाढोत्तरहस्ताश्च तथा भाद्रपदा मता
वंधने सर्वबीजानां तथा शालप्रवेशे दुःखदा वनदा वैशानुराधोत्तरफाल्गुणी॥२॥ स्वीनाम्नी कर्षके निःस्वं मेथिका
र्याफलप्रदमिति॥ अथ नवधान्यप्रसंगेन नवान्नकर्म द्विहाचरणेनाह॥ अन्नप्राशनमेरिति। वसंतशरदोः
रुत्वोः अन्नप्राशनमैर्नवान्नं नवान्नकर्म बुधैः प्रोक्तं॥ अथ प्राशनमैरिप लक्षणं। तस्मादन्नप्राशने प्रोक्तं तिथिवा
रादिकं अनवग्राह्यं सामिकस्पनवान्नकर्मणा विनाव्रीह्यादिर्नोनवमितानानवधान्यो गोप्यक्षणे दोषप्रसंगादाव
श्यकं कर्म ततः नवधान्यानि मानि। व्रीहयो यवगोधूमा नीवाराः कंगुवेणकः चालयो मुद्गमाषाश्च नवान्नाद्यानवानि
॥त्तिति। एषां शरत्वसंस वामिधान्यां निव्रीह्याग्रयणेन वीनान्नभक्षणी यानि वसंततः सत्तवानि। यवाग्रयणेन किंना
नभक्षणेया यानि इति नियमादिकं कर्म शरद्वसंतयोः क्रियते इति तदन्नप्राशनोदितेस्तिथिभादिभिः। मास्ते
षष्ठेष्टमे वेत्यतिमेत्रमनुराधा। -अर्को हस्तः। अंत्यरेवती। वसवो धनिष्ठा। उत्तराश्विस्त्वः। ईज्यः पुष्यः वरुण

२८ शततारका। इंद्रो ज्येष्ठा। तैर्नर्तनं आरंभेत्। संकीतकंच आरभेत्। कस्मिंसति। लग्ने वर्तमाने ज्ञे गुरुवीक्षते सति। कैः
हिबुकगैः सौम्यैः चतुर्थस्थानस्थितैः सौम्यैः शेषं प्राग्वत्। अथ नानापशूनांकर्म वृत्तेनाह ॥ ५७ ॥ द्वीशार्केद्वि
तीज्यवासवशिवाश्वेत्याग्निपाशींद्रभैः पूर्वोभिश्च सदा विसिंहभतनौ नानापशूनां क्रियाः ॥ वारेष्वर्कचतुर्षु कोनार
हरिताष्टसु मारिक्तयोर्नष्टमांनहिते दितास्तमगभे न स्यात्तद्दोषः किल ॥ २४ ॥ द्वीशेति। द्वी ईशो विशाखा। अर्कोह
स्तः। इंदुर्मृगः। अदितिः पुनर्वसुः। ईज्यः पुष्यः। वासवो धनिष्ठा। शिव आर्द्रा। अश्विनी प्र०। अंत्य रेवती। अग्निः कृत्ति
का। पाशी शततार०। इंद्रो ज्येष्ठा। पूर्वोक्तिस्त्रिभिः। विसिंहभतनौ। विगतः सिंहो येभ्यस्तानि विसिंहानि ॥ तानि च तानि
विसिंहभानि सिंहरहितराशयः। तेषां तनुः लग्नं तस्मिन् नानापशूनां क्रियाः शुभदा उदिताः पशूनां। क्रयविक्र
यादिकर्मशुभदं प्रोक्तमित्यर्थः ॥ अथोक्तवारार्थेन वर्जमाह। अर्कचतुर्षु वारेषु ॥ रविचंद्रबुधभौम। वारेषु। कोनारह
रिताष्टसु। कोणे हि त्रि। उत्तरास्तिस्रः। आषाढा मा हारः केतवं। हरिः श्रवणः। ताष्टसु चित्रा एषु अमारिक्तयोः। अमाअ
मावास्या रिक्ता नवमी चतुर्थी चतुर्दश्यः। आशाभन्यूतभयोः अष्टमीप्र० तस्या नानापशूनांक्रिया हितानुदि
ता ॥ अपवादमाह ॥ स्तमगभे सति सद्दोषो न स्यात्र दोषः कचित् पशुकर्मणि न स्यात्। लवलग्नबलं प्राग्वत्। उक्त
चक्षुरादि हि त्येवमुख्यास्ता केंद्रद्वीशौ। क्रियादिगोः। दर्शभूताष्टमी चित्राध्रुवक योग माघ सत्। सोमार्कैर्वैध
तौ याते लग्ने पंचानने बुधैः सदा सं कारिकासु पशुकर्म विवर्जयेत्। शुभग्रहोदये शुद्धे नेधने सर्पयोनिषु

वृक्षाद्युद्धिक्रियाशस्तापश्चान्नं मुनिभिः स्मृतेति॥ तथाचागमांतरे। सोमे भौमे बुधे वाँ गोनवीना स्तुरगाः शनौः। अन्य
स्यापूर्वोक्त यामृतमयूषस्वहुताशनेषु चंद्राग्निवाजिवसुधारणे शांकरेषु। एतेषु गोमहिषिदंतितुरगमादिनाना
शै प्रकारपशुजातिगतिः प्रशस्तेति॥ अथाश्वकर्महस्तेकेनाह॥ ७॥ आदित्यहस्तवसुस्थिराश्विममृदुस्वात्यर्कसैर्नत्रये।
कोराएहीज्यमृगृदये द्विक २।४। मदे ७ ष्विंदौ क्रियाश्वी हिता॥ तत्राप्यर्कसुतः क्रमात्स्तिथिमितैः पञ्चत्रिभिः सा
भिजितृशस्तायान्नृसमातदुक्तसमुखैः कार्या परैर्मिबुधैः॥१२५॥ आदित्येति। आदित्या पुनर्वसुपुष्यौ। हस्तवसुध
धनिष्ठाशततारके। स्थिराणिध्रु०। अश्विनी ध्रु० मृदुनि ध्रु० अर्को हस्तः स्वातिरत्न याकीराएहि। अत्र ये बुधगुरुशुक्राः अर्को
सूर्यः। अगोस्मोमः एषामहदिनं तस्मिन् ईज्यमृगृदये। उदयेलग्ने। ईज्यमृगो इति ज्यमृगोदयं तस्मिन् इज्यमृग
दये गुरुशुक्रलग्न इत्यर्थः॥ द्विकमदेषु इंदौ द्वितीयं कंच तुर्थ मदः सप्तमं एषु चंद्रेर्षः क्रिया। अश्वीक्रयविक्रयादि
द्विकी हिता॥ शुभकर्तास्यात्। अथाश्वचक्रमाह। तत्रापीति। तत्रापि आदित्यादिषु नक्षत्रेषु भत्स्वपि अर्कसुतः। स
नक्षत्रात्सकोशात् सुमतिथिमितैर्नक्षत्रै पुष्यादुक्रमतस्त्रिभिर्नक्षत्रै साभिजित् यथा स्यात्तथा अश्विया शस्ता शो
भनास्यात् एवसामान्यतो श्वकर्मोक्ते दानी विशेषमाह। येति। य आश्विकिन्नसमा मनुसहशासा क्रिया तदुक्ते
मुखेकार्या तस्मै मनुष्यायउक्तानि सुमुखानि नक्षत्राणि तिते कार्यैत्यर्थः लग्नबलं प्राग्वत्॥ तथा च नारदः विविदमु
चरभेक्षिप्रेमृदुभेस्थिरभेषु चावाजिकर्माखिलप्राहुः। सूर्यवारेविशेषतइति। तथा चोक्तं धृगाईचरकक्षीरत्
ण

२८ मुक्तादिभक्षणे। अन्नप्राशनवदृक्षं स्नानं सौम्यग्रहोदये। गर्भाधानोक्तं क्षुरकर्मेंदौ मेषजपैष्णोदितं १ गर्भाधानोक्तं मध्या
नां मैथुने तु वि। लोकयेत्।४।। गृहारंभादि तेकालेह यशालौ विधापते। शिक्षा वियोक्तकाले च भक्षणं भक्षणोदिते।।५।।
कर्मकार्मादिकं कार्यं जयायोगे शुभोदये। एवं खरो क्षुद्रादि कार्यं पूर्वाणि गृहगादिकं।। आथाभ्यंगनिषिद्धकालमाह
।।६।। भद्रासंक्रमवैधृतिसितेज्याकीरषष्ठ्यादिषु श्राद्धाहे प्रतिपद्दये ११ पहरिहरेद्ध तु विना भ्यंजनं।। मांगल्ये
विजयोत्सवाद्युद्वहनं दीपावलिहेतवो भ्यंगस्यं कथितादिते लमनि ज्ञं निषेधं न्हि निषेख विलं।।१३६।। भद्रेति। भद्रा प्र०
संक्रमः संक्रांतिः पातो व्यतीपातः वैधृति प्र० सितशुक्रवारः।। इज्यो गुरुवारः। अर्को रविवारः। आरो भौमवारः। षष्ठ्या
दयः। भवीक्षितयः ६।७।८।९।१०।११।१२।१३।१४।१५।३० श्राद्धाहः श्राद्धदिनं। प्रतिपद्दये तस्मी हेतु कारणं वि
ना। अभ्यंजनमभ्यंगपरिहरेत्। कारणे सति अवश्यं आचरेत्। इत्यर्थः सिद्धं। तथोक्तं सप्तम्यां न स्पृशेत्तैलं नवम्यं
प्रतिपत्तिथौ।। चतुर्दश्याष्टमीषष्ठ्या चैव विशेषतः।। ग्रंथांतरेपि। चतुर्दश्यष्टमी चैव पौर्णिमा व्यर्कसंक्रमः। तैलस्ना
नं न कुर्वीत सुतबंधुधनक्षयात्। तथा च वृद्धमनुः।। दर्शे। स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः। नवम्यां च न तेतत्र
निमित्तां सरसंभवः पतिपद्य नपत्यः स्यात् तृतीयायामपकः। ल्वि दशम्या शम्या धनस्तने सर्वं हंति त्रयोदशीति।।
चलमालाया। रविस्तापं कांतिवितरक्रः रतिश्राशीम्।। मितनयो मतिलक्ष्मी चांद्रिः सुरपतिगुरुवित्तंहरणं। विपति दे
त्यां गुरुरखिलभोगान्प्रसवनं। नृणां तैलाभ्यंगान्सपदि कुरुते सूर्यतनयः। अथाभ्यंगहेतुमाह। मांगल्येतिमति

मागल्यं विवाहादि॥ विजयोत्सवः आश्विनशुक्लदशम्यां क्रियते। अहर्वदनं संवत्सरप्रतिपत्। दीपावल्यां प्र०। एतेऽभ्यंगस्य हेत
वेः कारणानि एषु निषिद्धतिथ्यादावपि अभ्यंगः कर्तव्यः। तथोक्तं॥ व्यवहारसारे॥ संवत्सरादौ वसंतादौ सतकांतेमहो
त्सवे दीपो[त्स]वचतुर्दश्यामभ्यंगो नियमो न च तिः। तथा चोक्तं। स्कंदे विजयादशमी विजयानिषिद्धमपि कर्तव्यं तैला
भ्यंगजं [स्ना]नात्। इति। अथाभ्यंगनिषेधापवादमाह। कथितादितिनिंद्ये हि कथितादि तैलं अनसन्तशुभं स्यात्॥
आदित्यग्रहणात्। सार्षपं सुगंधपुष्पवासितं तैलं गृह्यते॥ एवं कथितादि तैलं निंद्यदिने पशुभमित्यर्थः। उक्तं च। सा
र्षपं गंधतैलं च यत्तैलं पुष्पवासितं॥ दिष्यांत्त युतं चापि न दुष्यति कदाचन। सत्यं शुक्रारवारेषु निषिद्धासु तिथिषु
पि पात सक्रं दास्नाने पक्कतैलं न दुष्यति॥ ५॥ रवौ पुष्पं गुरौ दूर्वा भौमवारे च मृत्तिका। भार्गवे गोमयं चैव स्नात्वा तैलस्ना
नं सुखावहं॥ २॥ अथ नित्याभ्यंगे विशेषमाह॥ नित्ये खिलमिति। नित्येऽभ्यंगे अखिलं तैलं पक्वापक्वं अनमत्॥
उक्तं च॥ नित्यस्नाने च कर्तव्ये तिथिदोषो न विद्यत इति। अथ प्रसंगेन तिमलमकस्नाने निषिद्धमाह॥ ५॥ द्विग्विश्वा
१०।१३ अद्रि ७ दृ २ गं क ९ दर्श ३०। तिथिषु धैस्नानं न धात्रीफलैः श्रीकामो थ बुधांत्तु पर्वसपित्र्ये सा भ्यंगात् पतित्यंगना॥ पु
त्रीसोमदिने प्रसूर्यमपि त्तलाद्धे द्रमिश्रं त्तुपक्रम्यादेश्वरसेकुपुत्रहरिजेत्स्नाशास्येपि न। १३७। द्विग्विश्वेति। द्विग्
दशमी॥ विश्वं त्रयोदशी। अद्रिः सप्तमी। दृग् २ द्वितीया। अंको नवमी। दर्शअमावास्या। एतेषु तिथिषु श्रीकामः धा

त्रीफलैः अमलकी कल्कैः स्नानं नाचरेत्। तथा चोक्तं। यः करोति॥ दशम्यां च स्नानमामलकैः महत्पुत्रहानिर्भवेत्तस्य त्रयोद
श्यां धनक्षयः। अथ पुत्रक्षयं तस्य द्वितीयायां न संशयः॥ अमायां च नवम्यां च सप्तम्यां च कुलक्षयः इति। अथ स्त्रीणां बु
धादि अभ्यं निषेधमाह। बुधो बुधवार अंबुपर्क्षे शततारकाः पितृमघा तेषु अभ्यंगस्तस्मात्। अभ्यंगना स्त्री पतिघ्नी स्या
त्। उक्तं च॥ स्नानं कुर्वति या नारी चंद्रे शततभिषग्गते। सप्तजन्म भवेयुस्ता विधवा दुर्भगा ध्रुवं। त्रिविक्रमशते। स्नान
नार्कभुके ज्यविविधिसंक्रांतिपर्वसु। द्युहषट्दिक्कु त्रयोदश्यां स्त्रियस्तु ज्ञमघांबुपैः॥ अथ त्रवत् सोमवारे अभ्यंगनिषे
धमाह। पुत्रीति। पुत्रवान् सोमदिने न स्नायात्। उक्तं च पुत्रवान् स्वगृहे नित्यं। नो यादुत्तरामुखं सोमवारे सदाभ्यंग
वर्जयेत्सर्वदा बुधः इति। अथ प्रसंगेन प्रसूतिकास्नाने निषिद्धमाह। + प्रमृतिरिति यमोत्तराली पितरो मघालापूर्वि
ना इंद्रो ज्येष्ठा मिश्र कृत्तिका विशाखे। अंबुपः शततारा कृत्या दे मूलं ईश्वर भ आर्द्रा एषा समाहारस्तस्मिन् कुपुत्रह
रिजे पुत्रितपुत्रः पुत्रप्राप्तो यस्य तत्। कुपुत्रं तत्त्वं ततू हरिजं च तस्मिन् तस्मात् लग्नात् पंचमस्थः पापग्रहा भवति॥
तस्मिन्नित्यर्थः। निशास्यं निशामुखं। सायंकाल तस्मिन् प्रसूतानस्नायात्॥ शेषलग्नबलं प्राग्वत्॥ उक्तं च। मघा
मूल विशाखार्द्री चित्रादिद्वयमद्वये॥ ज्येष्ठा सायं जले शार्क्षे न वै स्नायात्प्रसूतिका॥१॥ शुभग्रहयुते लग्ने पंचमे पापव
र्जिते परित्यज महान्दोषान् सूतिकास्नानमाचरेत्॥ अथौषधनिष्पादनमाह। ८७॥ मंदारान्यदिने मृदुध्रुव
चरक्षिप्रैर्बलस्थे सुधायोगे भेषजमाचरेत्क्रूरमनिकेंद्रारिव्ययांगस्थिषक्॥ तद्द्यादिहविध्रुवं दुतनयप्रद्योत

नोरोगिणोऽस्रकृस्रावव्रणाकर्म सूर्यकुजयोर्वा न्हीह केंद्रस्थयोः॥१२७॥ मंदारेति॥ मंदाः शनिः। आरो भौमः॥ ताभ्या
मन्ये रविचंद्रबुधगुरुशुक्राः तेषां दिन तस्मिन्॥ मृदुध्रुवचरक्षिप्रैर्नक्षत्रैः बलक्षे शुक्लपक्षे सुधायोगे ग्रंथांतरेच॥
सुमृतिकेंद्रारिव्ययांगे शोभनानी पापग्रहरहितानि मृतिकेंद्रारिव्ययानि। यस्मात् तत्। सुमृतिकेंद्रारिव्ययं॥ तत्र
तत्र अगं च तस्मिन् भिषक् वैद्यः। भेषजमाचरेत्। कुर्यात्। शोभं लग्नबलं प्राग्वत्। अथौषधदानमाह। तदिति। त
दौषधं इष्टानं तरोके भादौ दद्यात्। कथं स्नते इह॥ विध्रुवे तनय ध्रुवनक्षत्र बुधवाररहिते अथ रक्तस्रावव्रणयो
योर्विशेषमाह। अस्रकृस्रावो रक्तस्रावः व्रणः क्षतं अनयोः कर्म सूर्यकुजयोरहिवसे आचरेत्। कयोः सतोः इहान
योः सूर्यकुजयोः केंद्रस्थयोः तथा चोक्तं। मंदारवर्जिते वारे चरक्षिप्रमृदुध्रुवैः सूर्यसौम्यैः केंद्रगतैर्भेषजोत्याद
नं हितं॥१॥ रक्तस्रावं कुजे कुर्यात् तद्दोत्सा यामथापि वा। कुजे केंद्रस्थवा मंदे रवौ वानिखिलेष्टमे॥२॥ व्रणक्रिया कु
जे सूर्ये केंद्रगते तद्दिने शुभे। शुद्धे षष्ठे च सत्क्रूरे चरलग्ने युवस्वरे॥३॥ अथ पथ्यसंगेन रोगमुक्तिदिवसमानयेताई नाह
॥४॥ याम्याहित्रयवायुमूलजलपोपांत्येंद्रहस्तांबुभेशांतथाजद्विपयोन्नृपै १६ र्नवदिनैरन्यत्र रुग्णो विरुक्॥
॥ आर्द्रास्वाषनिलध्रुवांत्यपितृसेष्टु केंद्रुवारे गदस्यांकस्त्वानमनिष्टमिष्टमशुभे साद्देरवलस्तिस्थिरे॥१२८॥ याम्येति॥
याम्यं भरणी। अहित्रयं आश्लेषात्रयं। वायुः स्वाती। मूलप्र० जलपः शततारका। उपांत्य उषा। इंद्रो ज्येष्ठा। हस्तप्र० अंबु
भं। पूषा। अस्मिन्नक्षत्रगणे गुरुरुग्णः रोगी। शांत्यायथोक्तशांतिकेन विरुक् ज्वरमुक्तो भवति॥ एतज्ज्योतिषां कत्ति

प्रायं किंचिद्विशेषं कोशाशिप्रायमुक्तं। तत्र येषु नक्षत्रेषु ज्वरितस्य मृत्युरुक्तः॥ एषु चलक्षेत्रेण बहुभिर्दिनैर्ज्वरमुक्तिरुक्ता
तत् फलं मत्रशांत्याविकृतिरित्युक्तं। क्वचिदन्यथा फलदर्शनात्। तथा येषु येषु नक्षत्रेषु सप्तभिर्नवभिरेकादशभिर्दि
नैर्ज्वरमोचनमुक्तं तत्। फलत्रयमध्ये तेन नदिनैर्विकृतिरित्युक्तं। ग्रंथलाघवाय स्वल्पोत्तरत्वात्। तथा च ज्योतिषार्के॥
॥सप्ताहमतितिनंदा द्विरुद्रमृत्युनगाद्रिभिः॥ त्वष्ट्रमृत्युमृतिश्चैव वक्रपुष्ट्रौ यमुतान्वपे इत्यादि। अथोत्तरार्द्धेन रोग
मुक्तस्नानमाह॥ अदित्येति। आदित्यं पुनर्वसुः। अहिराश्लेषा। अनिलः स्वाति। ध्रुवाणि॰ अंत्यरेवती। पित्र्यमघा
अस्मिन्नक्षत्रगणे शुक्रे हुवारे शुक्रसोमवारे गदस्य रुक्स्नानं। रोगमुक्तस्नानं। अनिष्टं स्यात्। तर्हि कुत्र कर्तव्यमि
त्यत आह॥ अशुभे भादौ इष्टं शुभं स्यात्। कस्मिन्नस्थिरलग्ने पापे सप्तमे सति स्यर्थः। तथा चोक्तं॥ वैधृतौ व्यतीपाते च
भद्रायां धिष्ण्यसंक्रमे। रोगमुक्तो नरः स्नायात् कुवारे सौतिथिष्वपि॥१॥ ध्रुवं पापयुतं शस्तं दशमं च शुभान्वितं॥ सौ
म्यक्रूरयुतं दग्धं रोगस्नाने समं तथेति॥२॥ चंद्रबलं सर्वत्र योज्यं कुतिथ्यादौ सतिनेन चंद्रादिबलविषये मोहो
माभूदित्यत्र चंद्रबलं सूचितं। यतोऽग्रे श्यादौ गर्भाधाने सदिशा वित्युक्तं। ततः सर्वकर्मसु ज्ञेयं। तथा चोक्तं स्यहं। स्नायां
द्रोगविमुक्तस्तु शुभयोश्च इनारयोरिति। अथ द्रव्यव्यवहारवृत्तैकेनाह॥४॥ द्रव्यं सव्यवहारतोलघु चरे योज्यं
चरांगे बुधे धर्मो रेखा१०८ सज ५ गेषु घातस्य हरणो हा। व स्तोर विद्धः कुजः॥ संक्रांतिभरणी त्रिपुष्कर योकुंभांत्य योश्च
द्रमारद्विश्चेतिशुभा विदूनइह यत्कुर्याद् हणां नतत्स्थिरं॥१३०॥ द्रव्यमिति॥ द्रव्यं सुवर्णादि सव्यवहारतत्कुशीद

व्यवहारेण लघुर्वैरेनक्षत्रैर्योज्यं देयमित्यर्थः। कचरागे चरलग्ने कस्मिन्नमति। धर्मो नवमं। आत्मजः पंचमः ए न्यतमस्था
नगतो मनीत्यर्थः। अन्यत्पूर्वोक्तं ज्ञेयं॥ अथानंतरं यस्य प्रत्युक्तस्य द्रव्यस्य हरणं पुनर्ग्रहणं तस्मिन्निषिद्धे हस्तनक्षत्रे रवि
रविवारे कुजो भौमः वारः संक्रांतिः सूर्यसंक्रमदिनं मरणं प्र॰ त्रिपुष्करयोगः। यमो यमलयोगः॥ त्रिपुष्करयमलयो
गोर्ग्रंथांतरे प्रसिद्धौ। रत्नमालायां विषमचरणे धिष्ण्ये भद्रतिथिर्यदि यं जायेते। शनि रु गुरुक्ष्मापुत्राणां रु थं च नवास
रे मुनिभिरुदितः सोयं योगस्त्रिपुष्करसंज्ञरु इति॥ कुंभाद्ययोः श्विं द्रमाधनिकाः पंचकं। वृद्धिर्वृद्धिं योगोपि भूमः। ह
स्तादयोत्र स्वकीयद्रव्यग्रहणे शुभा विदून इह स्तौ क्षौ यद्दत्तं तत्तु स्थिरं स्यात्। तथा चोक्तं। चरैः क्षिप्रैः श्वरलग्ने बु
धे धर्मसुताष्टमे। व्यवहारादिनाद्द्रव्य प्रयोगो मुनिस्मृतः। मरणं संग्रहं कुर्यात् पंचके ज्ञेत्रिपुष्करः। रुणकमंच
रैः क्षिप्रैः रुणस्तेदः कुजे हिता। पंचके पंचगुणितं त्रिगुणं च त्रिपुष्करं। यमले द्विगुणं प्रोक्तं हानिर्वृद्ध्यादिरु कबुधैः
रुणं भेन कुर्वीत न देयं बुधवासरे रुणच्छेदं न कुजे कुर्यात् संचयं सोमनंदने॥ हस्तेर्क वारे संक्रांतौ यद्दत्तं स्यात् कुले
षु तत्। वृद्धियोगे तथा शेषं रुणच्छेदं तु कारयेत्॥५॥ अथ तीक्ष्णादिषु नष्टादि द्रव्यस्य अप्राप्तिं तथा द्रव्यनिक्षेपं च
ताईनाह॥ ४॥ तीक्ष्णोग्रध्रुवमिश्र वायुषु धनं नष्टादिकं नेति काद्रे ४ वध्या प्रे ४ स्व ३० शेषपोर्न गतमं यत्यां बु
ध्रुधौ क्षिपेत्॥ विद्यो यो रूव दिव्य देव तिथि से य डी रा म ल ध्र वे म द्व भी ज्य रु रां बुभुजे ल स्वा ओं गे तरू न
रोपयेत्॥१४९॥ तीक्ष्णेति। तीक्ष्णोग्रध्रुवमिश्राणि प्रोक्तानि वायुः स्वाती एषु नष्टादिकं धनं नष्ट प्रयुक्त

विनिः क्षिप्रादिकं ध्रुवं हन्तैति। नागतिर्यथाकार्त्तो रोहिणीनक्षत्रात् मेष इष्टनक्षत्रे अश्वाप्नचतुष्के सति। खनिशेषयोग
तं नणती। २ अथ व्यतिक्षेपमाह॥ अस्यां त्रुमुहौ क्षिपेत्। धनमित्यनुषंगः। अंत्य द्वादशी। अज चतुर्थ अनयोः शुद्धिः
पापग्रहरहितानि॥ तस्यां सत्यां। क्षिपेत्। निक्षिपेदित्यः। तथा चोक्तं। साधारणो गतीक्ष्णो पुत्रात्तोरद्रव्यं न लभ्यते॥
दत्तं प्रयुक्तं निक्षिप्तं न प्रलेत्याह गार्गः॥ अथ नृसिंहादि मंत्रविद्यासाधनमुहूर्तं तथा वृक्षरोपणमुहूर्तं चोत्तरार्द्धेनाह॥
विद्यामंत्रविद्योपोकेवत्। वदविद्योक्तमादौ विद्यामोऽनुक्तमाद्यावित्याद्युक्ते॥ तथा स्वदेवतिथिषु। स्वेष्टदेवतिथि
नक्षत्रे साधयेत्॥ गुरुमुखाद्ग्राहीयात् इत्यर्थः। तत्र आगमोक्तं संग्रहणे अनध्यायदोषो नास्ति। मतुस्वदेवतिथि
मे इत्यनेनैव पदेन च परिहृतः। तथा चोक्तं। मृदुध्रुवचरक्षिप्रैर्वा राकौ धमसक्रिया। कार्या विधुज्ञे चोक्तेऽदीक्षा
स्वदेवतिथिमेषु च ति॥ १॥ अथ वृक्षरोपमाह। हीशां विशाखा। मूलप्र० ध्रुवाणि पूर्वोक्तानि। अश्विनीप्रसिद्धः ईज्यः
पुष्यः कोहस्तः अंबुपः शततारका॥ एभिर्नक्षत्रैः अंघ्रिपान् रोपयेत्। कस्मिन् सुजलखांशगे। अंगे अजः अजांगं
अगलग्नं तस्मिन्। अजः जलचरराशिः चन्द्रो वा नृत्। अजांग उच्यते। जलचरं च जलखे शोभने जलखे यस्य तत्
सुजलखत्त्वतदंजांगं च सुजलखांशगं तस्मिन् शोभने पापग्रहरहिते। जलखे चतुर्थदशमे यस्य अंगस्य तस्मिन्नि
त्यर्थः। शेषं पूर्ववत्। अथ वापीकूपादीनुत्तरार्द्धेनाह॥ ७॥ उत्तराहस्त हरित्रया दितिहस्ते ज्येष्ठे स्ततडागादौ योग्योज्या
ज्येष्ठ तृतीयौ सितेदशामगेसिध्यंति महासरे॥ रोजसाश्ववणत्रयध्रुव मृदु क्षिप्रैस्त केंद्रायकैगे शांतिक पौष्टिके स

चरभैरेनै।सुधर्मोदये।उद्वाहर्क्षेति।उद्वाहर्क्षाणि।एकादशसंख्यानि।पूर्वोक्तानि।हरिवित्रयंश्रवणत्रयं।अदितिपुनर्वसु
द्वयः अश्विनी।इज्यर्क्षः पुष्यः एभिस्तडागादयो जलाशयाः सिध्यंति।कैः जेज्याकैः स्तनुगैः।ज्ञो बुधः।इज्यो गुरुः।अब्ज
श्चंद्रो जलराशिश्च एते स्तनुगैः क्रमशः द्वासेर।सग्रहवार इत्यर्थः।तथा चोक्तं।चित्रास्वातीपुनर्वसुमघाशिरो मूलाश्विनी
रोहिणी।।हस्तः पुष्यधनिष्ठभं शतभिषक् उ॰मित्रो नगरे वनी।।एतेषु श्रवणान्वितेषु मकरे लग्ने च कुंभे झषे कर्की कू
पजलाशयादिखननं शस्तं प्रशस्ते दिने।।अन्यचोक्तं।सर्वयात्रायारंभं कर्तव्यो विमलैः खगैः।।लग्नस्थजेथवाजी
वेलग्नभे जेक्षिते खलो।।३।।अथो नृपार्द्धेन राजदर्शनं शांतिपौष्टिके चाह।।गोक्षेति।श्रवणध्रुवमृदुक्षिप्रैर्न जे
क्षत्रैः राजेक्षादर्शनं कार्यं।अन्यत्सुगमं।पुनः कैः सौम्यैर्ग्रहैः द्वि२केंद्रायगैः १।४।७।१०।११ लग्नाद्विकेंक
द्रायकैः शुभग्रहैरित्यर्थः।।शांतिकपौष्टिके आह।।शांकरणैः षिकेए तै नैवनक्षत्रैः श्रवणादिषि विधेये कथंभूतै
रतैः सचरभैः चरनक्षत्रसहितैः।।कस्मिन्सुधर्मोदये शोभनः।।पापरहितः धर्मो नवमयस्य सुधर्मः।।सवासो
उदयश्च सतथा।उदयो लग्नं तस्मिन्नित्यर्थः।।शेषं प्राग्वत्।।अथ प्रहणार्द्धेनाह।।द्वियंनैवमलिम्लुचेवि।धुसिते
ज्यास्ते रगावष्टमे मंदा राह्निस्वलोदयो स्थिर तन्नौ कुर्यात्स्तेदोन्यथा।।श्रीशैलग्रहणायनेषु विषुवे संक्रान्तिजा
तांखुपाकृत्युक्तगवधूप्रवेशा नगयागोदामुनिस्याद्द्के।।१४२।।द्वियमिति।।मलिम्लुचेमलामासे।विधुसि
तेज्यास्ते विधुश्चंद्रः सितः शुक्रः।इज्यो गुरुः।तेषामस्ते।विधास्तैं कृष्णा॰पक्षे सवति।रगावष्टमे।।गोचरेणस्त

येष्टमे। मंदशान्हि। शनिसोमदिने। खलोदयेपापग्रहस्योदये। यद्वाउदयेखलः॥ तस्मिन्नस्थिरतनौस्थिरलग्ने दिव्यंनै
नकुर्यात्॥ अत्रदिव्येकृते सति। अदोइदंदिव्यंअन्यथाविपरीतंस्यात्॥ ४॥ अस्पष्टवादिनोजयकारीभवतीत्यर्थः॥ अ
र्थादन्यत्रकर्तव्यमितिभावः॥ लग्नबलंप्राग्वत्॥ अथगुरुशुक्रमौढ्यदोषः॥ कुत्रकुत्रेनास्तितत्रसाहदिदत्तेनाह। श्रीशै
लेति। श्रीशैलप्र० पत्रमल्लिकार्जुनाभिधानं। लिंगमस्ति॥ ग्रहणंचंद्रसूर्ययोः। अयनेदक्षिणोत्तरेकर्कटमकरसंक्रा
न्ती विषुवमेषतुलासंक्रमः। संकीर्णजातिहीनजातिः। उपाकृती उपाकर्म। उत्सर्गश्छंदसामुत्सर्गः। वधूप्रवेशनप्र० गया
प्र० गदाप्र०। नित्याह्निकंप्रतिवर्षतुक्रियते यथा नवरात्रं॥ ७॥ इन्द्राग्न्याहिबलौ रेः शयनपर्यावर्तनेनैत्यकेयानेजी
र्णोद्धारे वरोहदमनारोपपवित्रार्पणे चातुर्मास्यविधौ नजीवसितयोमूढत्वदोषोष्टकोत्सुत्साहा बटधारणेयुगादिनो
गर्भादिसंस्कारेष्वपि॥ ७४३॥ ईशानाहिबलाविति॥ ईशानाहिबलिः। इन्द्राग्नबलिप्र०। अहिबलिसर्पबलिः। हरेः
शयनपर्यावर्तनेवैष्णवविष्णोः शयनमाषाढशुद्धैकादश्यांभवति। परावर्तनंभाद्रपदशुद्धद्वादश्यांभवति। नैत्यक
यानंनित्यगमनं॥ जीर्णोद्धारः हंप्र०। अवरोहः पर्वतावरोहणं। दमनारोपश्चैत्र्यां पवित्रारोपणंश्रावण्यां। चातुर्मास्य
विधौ चातुर्मास्यव्रतअष्टकाः पंचगीयाक्षरनाम्नो मासानाकृष्णाष्टम्याष्टकाः॥ मार्गशीर्षपौषमाघफाल्गुनकृ
ष्णाष्टम्य इत्यर्थः॥ उत्साहा पुत्रोत्सवादयः॥ अश्रुकंधारवस्त्रधारणं॥ एषुजीवसितयोः गुरुशुक्रयोः मूढत्वदो
षोनगदितः॥ गर्भाद्यंन्नाशनांतेष्विषि त्यक्त्वाकेयद्यपिप्रागुक्तं तथाप्यत्रप्रसंगादुक्तं॥ तथागर्गः॥ नित्ययानेगृ

ह्नेजीर्णेप्राशनेपरिधानके। वधूप्रवेशेमांगल्येमौढ्यंचगुरुशुक्रयोः॥१॥ भृगुउपाकर्मोपसर्जनेपवित्रदमनार्पणे॥
अवरोहः महेमंतपणोगांबालरक्षकाः॥२॥ ईशानस्यबलिर्विष्णोः शयनंपरिवर्तनं॥ कुर्याच्छुक्रस्यचगुरौमौढ्येप्रीति
विनिश्चयात्॥३॥ धर्मप्रदीपे। गोदावर्यांगङ्गायांचश्रीशैलेग्रहणाह्वये॥ अयनेविषुवेचैवचातुर्मास्यव्रतेषुच॥४॥ उ
त्सवेषुचसर्वेषुसीमंतकर्मतुकर्मसु॥ शुभाशुभेज्ययोश्चैवमौढ्यदोषोनविद्यते॥५॥ कालनिर्णये। नष्टेशुक्रेतथाजीवे
सिंहस्थेचबृहस्पतौ। कार्यावैवस्त्रदेव्यर्च्चाप्रत्यब्दंकुलधर्मतः॥ मत्स्यपुराणे॥ मौढ्यापिचप्रकर्तव्यामिश्रजातिःक्रि
याशुभा॥ शुक्रेज्यशुक्रयोर्वर्णाक्रियाःश्रेलादिकानिवृत्॥ अथतीर्थयात्रानिषेधंसापवादंदर्शनैकेगाह॥ गुर्वेरस्तम
येधिकसंक्षयजनुर्मासेषुजन्मर्क्षकेनापूर्वमतीर्थदर्शनमियान्नोदागयाभ्यांमृते॥ एषामाहमहस्यविष्णुशयने
षत्प्रत्यकर्मत्यजेद्यद्वर्षाधिकंलंबितंभवतितन्नोदागयातोन्यतः॥१९५॥ गुर्वोरिति। शुक्रेज्यस्तमये। अधिक
मासंक्षयमासः। जनुर्मासः। जन्ममासः। त्रिषुजन्मके जन्मनक्षत्रे॥ अपूर्वेप्रथमतीर्थामरदर्शनं। तन्निमित्तंनस्यात्।
नगच्छेत्। काभ्यांमृते॥ गोदागयाभ्यांमृते। गोदागयोर्दर्शनंसदैवकुर्यादित्यर्थः। प्रेतकर्मनिषेधमाह। एषुविति। एषु
गुरुशुक्रास्तादिमासाष्टमहस्यविष्णुशयनेऽपियद्वर्षाधिकंलंबितं। प्रेतकर्मभवतितत्त्यजेत्। गोदागयातोन्यतः
गोदागययोःसदैवकुर्यात्॥ आषाढशुक्लद्वादश्यादिकार्तिकशुक्लद्वादशीपर्यंतंविष्णुशयनमित्यर्थः॥ आद्यश
रदोविनाप्रथमवर्षंविनागौतमीमयाभ्यांशाकात्। अन्यतीर्थविषुप्रेतसर्वकर्मणोविदधीतनगौकुर्वीत। प्रथमवर्षोनि

३४ छिद्रकालेपि कर्त्तव्यमित्यर्थसिद्धं।अतिक्रांतवर्षप्रेतकर्मगयादयो निषिद्धेपि शुक्रेज्यास्तादिके काले विदधीत इत्यर्थः
तथा चोक्तं।बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते।मलमासइवैतानि वर्जयेद्देवदर्शनं॥१॥ व्यासः।अधिमासेच
जन्मर्क्षे नष्टयोर्गुरुशुक्रयोः॥तीर्थयात्रा न कर्तव्या गयां गोदावरीं विना॥२॥ गर्गः॥मलमासेप्यनाहूते तीर्थस्नानं न वि
